"क्रुद्धेन भीतेन पिपासितेन
शोकाभितप्तेन बुभुक्षितेन ।
व्यायामभाराध्वपरिक्षतेन
वेगावरोधाभिहतेन चापि ॥
अत्यम्लरूक्षावततोदरेण
साजीर्णभुक्तेन तथाबलेन ।
उष्णाभितप्तेन च सेव्यमानं
करोति मद्यं विविधान् विकारान् ॥"
तानेव विकारान् विवृणोति ।
"पानात्ययं परमदं पानाजीर्णमथापि वा ॥"
पानविकारान् विवृणोति ।
"पानविभ्रमसुग्रञ्च तेषां वक्ष्यामि लक्षणम् ।"
तत्र मदात्ययस्य सामान्यं लक्षणमाह ।
"शरीरदुःखं बलवत् प्रमोहो हृदयव्यथा ।
अरुचिः प्रततं तृष्णा ज्वरः शीतोष्णलक्षणः ॥
शिरःपार्श्वास्थिसन्धीनां वेदना विद्यते यथा ।
जायतेऽतिबलात् जृम्भा स्फुरणं वेपनं श्रमः ॥
उरोविबन्धः कासश्च श्वासो हिक्का प्रजागरः ।
शरीरकम्पः कर्णाक्षिमुखरोगास्त्रिकग्रहः ॥
छर्द्दिविड्भेदावुत्क्लेशो वातपित्तकफात्मकः ।
भ्रमः प्रलापो रूपाणामसताञ्चैव दर्शनम् ॥
तृणभस्मलतापर्णपांशुभिश्चावपूरितम् ।
प्रधर्षणं विहङ्गैश्च भ्रान्तचेताः स मन्यते ॥
व्याकुलानामशस्तानां स्वप्नानां दर्शनानि च ।
मदात्ययस्य रूपाणि सर्व्वाण्येतानि लक्ष-
येत् ॥"
अथ मदात्ययस्य वातिकस्य निदानमाह ।
"स्त्रीशोकभयभाराध्वकर्म्मभिर्योऽतिकर्षितः ।
रूक्षाल्पप्रमिताशी च यः पिबत्यतिमात्रया ॥
रूक्षं परिणतं मद्यं निशि निद्रां निहन्ति च ।
करोति तस्य तच्छीघ्रं वातप्रायं मदात्ययम् ॥"
तत मद्यम् ॥ * ॥ अथ तस्य लक्षणमाह ।
"हिक्काश्वासशिरःकम्पपार्श्वशूलप्रजागरैः ।
विद्याद्बहुप्रलापस्य वातप्रायं मदात्ययम् ॥"
अथ पैत्तिकस्य निदानमाह ।
"तीक्ष्णोष्णं मद्यमम्लञ्च योऽतिमात्रं निषेवते ।
अम्लोष्णतीक्ष्णभोजी च क्रोधनोऽग्न्यातपप्रियः ।
तस्योपजायते तीव्रः पित्तप्रायो मदात्ययः ॥"
अथ तस्य लक्षणमाह ।
"तृष्णादाहज्वरस्वेदमोहातीसारविभ्रमैः ।
विद्याद्धरितवर्णस्य पित्तप्रायं मदात्ययम् ॥"
अथ श्लैष्मिकस्य मद त्ययस्य निदानमाह ।
"मधुरस्निग्धगुर्व्वाशी यः पिबत्यतिमात्रया ।
अव्यायामदिवास्वप्नशय्यासनसुखे रतः ।
मदात्ययं कफप्रायं स नरो लभते ध्रुवम् ॥"
अथ तस्य लक्षणमाह ।
"छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः ।
विद्याच्छीतपरीतस्य कफप्रायं मदात्ययम् ॥"
अथ सान्निपातिकस्य मदातयस्य निदानं
लक्षणञ्चाह ।
"त्रिदोषहेतुभिः सर्व्वैः सर्व्वैर्लिङ्गैर्मदात्ययः ॥"
अथ परमदमाह ।

"श्लेष्मोच्छ्रयोऽङ्गगुरुता विरसास्यता च
विण्मूत्रसक्तिरथ तन्द्रिररोचकश्च ।
लिङ्गं परस्य तु मदस्य वदन्ति तज्ज्ञा
स्तृष्णा रुजा शिरसि सन्धिषु चापि भेदः ॥"
तन्द्रिस्तन्द्रा ॥ * ॥ पानाजीर्णमाह ।
"आध्मानमुग्रमथवोद्गिरणं विदाहः
पाने त्वजीर्णमुपगच्छति लक्षणानि ।"
उद्गिरणं वान्तिः उद्गारो वा । पीयत इति
पानं मद्यम् ॥ * ॥ पानविभ्रममाह ।
"हृद्गात्रतोदकफसंस्रवकण्ठधूम-
मूर्च्छावमीज्वरशिरोरुजनप्रदेहाः ।
द्वेषः सुरान्नविकृतेषु च तेषु तेषु
तं पानविभ्रममुशन्त्यखिलेषु धीराः ॥"
कण्ठधूमः कण्ठाद्धूमनिर्गम इव । प्रदेहः कफेन
लिप्तास्यता । द्वेषः सुरान्नविकृतेषु सुराविका-
रेषु अन्नविकारेषु च द्वेषः ।
अखिलेषु मद्यविकारेषु ॥ * ॥ असाध्यानां
मदात्ययादीनां लक्षणमाह ।
"हीनोत्तरौष्ठमतिशीतममन्ददाहं
तैलप्रभास्यमतिपानहतं त्यजेच्च ।
जिह्वौष्ठदन्तमसितन्त्वथवापि नीलं
पीते च यस्य नयने रुधिरप्रभे च ॥
हिक्का ज्वरो वमथुवेपथुपार्श्वशूलाः
कासभ्रमावपि च पानहतं त्यजेत्तम् ॥"
अथ मदात्ययादीनां चिकित्सा ।
"मदोत्थानान्तु रोगाणां मद्यमेव हि भेषजम् ।
यथा दहनदग्धानां दहनस्वेदनं हितं ।
मिथ्यातिहीनमद्येन यो व्याधिरुपजायते ।
समेनैव निपीतेन मद्येन स हि शाम्यति ॥
बीजपूरकवृक्षाम्लकोलदाड़िमसंयुतम् ।
यवानीहपुषाजाजीशृङ्गवेरावचूर्णितम् ॥
सस्नेहैः शक्तुभिर्युक्तमवदंशैश्चिरोत्थितम् ।
दद्यात् सलवणं मद्यं पैष्टिकं वातशान्तये ॥
मद्यं सौवर्च्चलव्योषयुक्तं किञ्चिज्जलान्वितम् ।
जीर्णमद्याय दातव्यं वातपानात्ययापहम् ॥
चव्यं सौवर्च्चलं हिङ्गु पूरकं विश्वदीप्यकम् ।
चूर्णं मद्येन पातव्यं पानात्ययरुजापहम् ॥
लावतित्तिरिदक्षाणां रसैश्च शिखिनामपि ।
पक्षिणां मृगमत्स्यानामानूपनां तथोदनैः ॥
स्निग्धोष्णलवणाम्लैश्च वेसवारैर्मुखप्रियैः ।
स्निग्धैर्गोधूमिकैरन्नैर्व्वातमदात्ययं जयेत् ॥
नारीणां यौवनोष्णानां निर्द्दयैरुपगूहनैः ।
श्रोण्यूरुकुचभारैश्च संरोधोष्णसुखप्रदैः ॥
शयनाच्छादनैरुष्णैरुष्णैश्चान्तर्गृहैः सुखैः ।
उत्पन्नो मारुतात् शीघ्रं प्रशाम्यति मदा-
त्ययः ॥
पित्तपानात्यये योज्याः सर्व्वतश्च क्रिया हिमाः ।
सितामाक्षिकसंयुक्तं मद्यमर्द्धोदकं पिबेत् ॥
मद्यं खर्ज्जूरमृद्वीकापरूषकरसैर्युतम् ।
सदाड़िमरसं शीतं शक्तुभिश्चावचूर्णितम् ॥
सशर्करं वा माध्वीकं संयुक्तमथवाऽपरम् ।
दद्यात् बहूदकं काले पातुं पित्तमदात्यये ॥

शशान् कपिञ्जलानेणान् लावानसितपुच्छकान् ।
मधुराम्लान् प्रयुञ्जीत भोजने शालिषष्टिकान् ॥
पटोलयूषमिश्रं वा छागलं कल्पयेद्रसम् ।
सतीलं मुद्गमिश्रं वा दाड़िमामलकान्वितम् ॥
द्राक्षामलकखर्ज्जूरपरूषकरसेन च ।
कल्पयेत् तर्पणान् यूषान् रसांश्च विविधात्म-
कान् ॥
शीतानि चान्नपानानि शीतशय्यासनानि च ।
शीतवातजलस्पर्शाः शीतान्युपवनानि च ॥
क्षौमपद्मोत्पलानाञ्च मणीनां मौक्तिकस्य च ।
चन्दनोदकशीतानां स्पर्शाश्चन्द्रांशुशीतलाः ।
रूक्षतर्पणसंयुक्तं यवानीयोषसंयुतम् ।
यवगोधूमकं चान्नं रूक्षयूषेण भोजयेत् ॥
कुलत्थानाञ्च शुष्काणां मूलकानां रसेन वा ।
प्रभूतकटुसंयुक्तं यावान्नं वा प्रदापयेत् ॥
छागमांसरसं रूक्षमम्लं वा जाङ्गलं रसम् ।
व्योषयूषं मनागम्लं पिबेत् कफमदात्यये ॥
स्थाल्यामथ कपाले वा भृष्टं कृत्वा तु नीरसम् ।
कट्वम्ललवणं मांसं खादेत् कफमदात्यये ॥
पाचकद्रव्ययुक्तेन मद्येनोल्लेखनं मतम् ।
मदात्यये कफोद्भूते लङ्घनञ्च यथाबलम् ॥
यदिदं कर्म्म निर्द्दिष्टं वातपित्तकफान् प्रति ।
सर्व्वजे सर्व्वमेवेदं प्रयोक्तव्यं चिकित्सकैः ॥"
इति भावप्रकाशः ॥
गरुड़पुराणोक्तमदात्ययनिदानादिकं तत्रैव
१६० अध्याये द्रष्टव्यम् ॥ ( तथाचास्य सकारण-
लक्षणचिकित्सादिकं यथा,—
"हालाहलाहलसमं भजते वियोगात्
सेव्यं न शिष्यमनुजैः कथितं मुनीन्द्रैः ।
तृष्णा वमिः श्वसनमोहनदाहतृष्णा
संजायतेऽतिसरणं विकलेन्द्रियत्वम् ॥
ये नित्यसेवनाहृष्टा मद्यस्य मनुजा भृशम् ।
विषमाहारसदृशी सुरा मोहनकारिणी ॥
यथा विषं प्राणहरं वियोगाद्
योगेन तच्चाप्यमृतं वदन्ति ।
तथा सुरा योगयुता हिता स्या-
दयोगतश्चारभतेऽतिकष्टम् ॥
क्षुधातुरे तृषाक्रान्ते सुरा वा भोजनं विना ।
न च क्षीणैर्विना भक्ता विनाहारातिपानकम् ॥
अत्यशनेऽप्यजीर्णेऽपि सुरा पीता रुजाकरी ।
यस्य प्रलपनञ्चापि न च वातमदात्ययः ।
दाहमूर्च्छातिसारश्च ज्वरः पित्तमदात्यये ॥
छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवम् ।
शीतता च प्रतिश्यायः कफजे च मदात्यये ।
त्रिषु दोषेषु समता लिङ्गैर्येषामुपक्रमः ।
स त्रिदोषसमुद्भूतो मदमूर्च्छा भिषग्वर ! ॥
वमनञ्च प्रशस्तञ्च निद्रासंसेवनं पुनः ।
स्नानं हितं पयःपानं भोजने सगुड़ं दधि ॥
मस्तुखण्डं सखर्ज्जूरं मृद्वीका दाड़िमाम्लिका ।
आमला च परूषञ्च लेहो हन्ति मदात्ययम् ॥
द्राक्षामलकखर्ज्जूरपरूषकरसेन वा ।
कल्कयेत् पयसा तत्तु पानं सर्व्वमदात्यये ॥